# Kumaravirachitam Gauri Stava

# કુમારવિરચિતં ગૌરીસ્તવઃ

## Document Information

Text title : Kumaravirachitam Gauri Stava

File name : gaurIstavaHkumAravirachitam.itx

Category : devii, devI, shivarahasya, pArvatI

Location : doc_devii

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 13| 60-66||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 7, 2023

*sanskritdocuments.org*

# કુમારવિરચિતં ગૌરીસ્તવઃ

સા ગૌરી સુખરાશિરેવ સુકૃતશ્રેણીસુધાસાગરઃ
 સૌન્દર્યદ્રવવાહિની ચ સતતં સા વાહિની સમ્પદામ્ ।
આપદ્રાશિવિનાશિની ખલુ મહાપાપાશનૈઃ સા શનૈઃ
 એતન્મે શયનં સમેત્ય શમુમા મહ્યં પ્રદાસ્યત્યપિ ॥ ૧॥

ગૌરી શારદપૂર્ણચન્દ્રવદના દૃષ્ટાઽપ્યટૈર્મુહુઃ
 કષ્ટં દુષ્ટમપાકરિષ્યતિ મુહુઃ સ્પૃષ્ટા મુખામ્ભોનિધિમ્ । (દુઃખં)
સૃષ્ટ્વા સૃષ્ટિવિચક્ષણા ખલુ મુહુર્દૃષ્ટિપ્રવૃષ્ટિં પરાં
 સ્રષ્ટુર્દૃષ્ટિવિશેષ યોષિત તનું કુર્યાદદૃષ્ટાન્વિતમ્ ॥ ૨॥ (પોષિત)

ભાગ્યૈર્ભૂરિતપઃપ્રભાવભવનૈઃ સમ્ભાવનીયાન્ મુહુઃ
 ભક્તાભીષ્ટફલપ્રદાનનિપુણા સાઽતિપ્રવીણા ક્ષણમ્ ।
ધ્યાતાઽપિ ક્ષણદા પ્રતિક્ષણમતિશ્લક્ષ્ણં ભવાની કદા
 દ્રષ્ટવ્યા નયનશ્રમાપહરણં કર્તવ્યમત્યાદરૈઃ ॥ ૩॥

ધન્યાનાં ભવનેષુ સા ગિરિસુતા વિન્યસ્ય પાદામ્બુજં
 સ્થિત્વા સા ક્ષણમાત્રમાદરયુતા તદ્દ્વારપાલાઙ્ગણે ।
ઇચ્છન્તી કમલાવિલાસમસકૃત્ તદ્દ્વારપાલાઙ્ગણે-
 પ્યાલસ્યેન વિના રમાવિહરણં સા કર્તુમન્વિચ્છતિ ॥ ૪॥

દેવાનામપિ વન્દ્ય એવ સતતં યત્પાદુકારાધકઃ
 તત્પાદામ્બુરુહં સ્મરન્તિ સુકૃતૈઃ કાન્તૈરનન્તૈરપિ ।
તન્માત્રસ્મરણેન સુન્દરતરે સાપીન્દિરામન્દિરે
 તત્સેવાનિરતા કદાપિ વિરતા શ્રાન્તા ન સઞ્જાયતે ॥ ૫॥

જાતશ્ચેજ્જનનીમનોજ્ઞજઠરે ગૌરીપદામ્ભોરુહં
 સ્મૃત્વા ભૂપતિતામુપેત્ય બહુધા ભુક્ત્વાઽપિ ભોગાન્ બહૂન્ ।
કુર્વન્ શામ્ભવપાલનં બહુધનૈઃ કુર્વન્ શિવારાધનં
 કાશીં પ્રાપ્ય વિમુચ્યતે મુનિવરારાધ્યામસાધ્યામપિ ॥ ૬॥

દૃષ્ટા ચેદ્ગિરિરાજરાજતનયા નેત્રોત્સવો જાયતે
 સર્વાઙ્ગં પુલકાઞ્ચિતં ચ ન મનઃ કિં તત્ પ્રસન્નં મમ ।
નિત્યાનન્દસુધાપ્રસારલહરીકલ્લોલમાલાકુલઃ
 કાલં કિં ન નયામિ કાલકલના સા કાલકાલસ્ય મે ॥ ૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કુમારવિરચિતં ગૌરીસ્તવઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૧૩। ૬૦-૬૬॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 13. 60-66..

Proofread by Ruma Dewan

---

*Kumaravirachitam Gauri Stava*

pdf was typeset on May 7, 2023

Please send corrections to *sanskrit@cheerful.com*